दैनिकं ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः
himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः
▪ पृष्ठ-4 ▪ वर्ष-3 ▪ अङ्क-140
1
12.03.2024 मंगलवासरः वि.सं. २०८० फाल्गुणशुक्लपक्षः द्वितीया फाल्गुण २९ प्रविष्ठांशः
Website- www.himsanskritam.com Email-himsanskrit@gmail.com

इन्दौराविधानसभाक्षेत्राय कोटिमूल्यानां उपायनानि मुख्यमन्त्री स्वस्य प्रवासे उद्घाटनानि, आधारशिलाः च अस्थापयत् 2



मण्डीतः चंडीगढ़पर्यन्तं मात्रहोरात्रयम् प्रधानमंत्रिणा नरेन्द्रमोदिना किरतपुर-मनाली-चतुष्पंक्तिराजमार्गस्य पुङ्गपर्यन्तं लोकार्पणम् कृतम् 3



दर्पणः बङ्गीयकथामूलस्य संस्कृतानुवादः 4



## हरियाणायाः गुरुग्रामात् राष्ट्रियराजमार्ग-परियोजनानाम् उद्घाटनं शिलान्यासञ्च




प्रधानमन्त्रिणा नरेन्द्रमोदिना हरियाणायाः गुरुग्रामात् विभिन्न राज्याणां कृते प्रायः एकलक्ष-कोटि-रुप्यकाणां व्ययेन समस्त-द्वादशाधिकैकशतं यावत् राष्ट्रिय राजमार्ग-परियोजनानाम् उद्घाटनं शिलान्यासं च विहितम्। एताः परियोजनाः देशस्य सामाजिकार्थिक विकासे सहयोगं प्रदास्यन्ति । प्रधानमन्त्रिणा अष्टमार्गात्मकस्य द्वारका एक्सप्रेस-वे इत्यस्य ऊनविंशति किलोमीटर परिमितस्य हरियाणा खण्डस्य अपि उद्घाटनं विहितम्। मार्गस्यास्य निर्माणं प्रायः एकचत्वारिंशत् शतं कोटिरुप्यकाणां व्ययेन कृतम् अस्ति। अस्य मार्गस्य निर्माणेन दिल्ली-गुरुग्राम सम्पर्क मार्गेण इन्दिरागांधी-अन्ताराष्ट्रिय विमान स्थानकं यावत् प्राप्तुं सरलं भविष्यति।

## भारतीयस्टेट-बैङ्क इत्यस्मै निर्वाचनबन्धनानां विवरणं निर्वाचनायोगाय प्रदातुं निर्देशः




भारतीयस्टेट-बैङ्क इत्यस्य समयविस्तारसम्बद्ध अनुमोदनम् अस्वीकुर्वता कार्यकालावसान- पर्यन्तं निर्वाचनबन्धनानां विवरणं निर्वाचनायोगाय प्रदातुं निर्देशो दत्तः। मुख्यन्यायाधीशस्य डी.वाई. चन्द्रचूडस्य नेतृत्वे पञ्चसदस्यात्मक-पीठिकया निर्वाचनायोगाय निर्दिष्टं यत् सः मार्चमासस्य पञ्चदश-दिनाङ्के सायं पञ्च-वादनपर्यन्तं बैंकेन प्रकाशित-विवरणं स्वीयाधिकारिकसन्जालस्थले प्रकाशयतु। एसबीआई इत्यनेन समयविस्ताराय सर्वोच्चन्यायालयस्य समीपे गतः आसीत्, येन जूनमासस्य त्रिंशत् दिनाङ्क-पर्यन्तं विवरणं प्रकाशयितुं शक्यते स्म। सर्वोच्चन्यायालयेन फरवरी-मासस्य पञ्चदश दिनाङ्के निर्वाचनबन्धनयोजनाम् अस्वीकृत्य निर्वाचनायोगाय निर्दिष्टः यत् सः मार्च त्रयोदशपर्यन्तं दानस्य विवरणं सामाजिकं करोतु इति।

## राष्ट्रपतिः द्रौपदी मुर्मुः मॉरिशसदेशं सम्प्राप्तवती

राष्ट्रपतिः द्रौपदी मुर्मुः मरिशस देशस्य राष्ट्रिय-दिवस समारोहे मुख्यातिथि रुपेण सम्मिलितुं मॉरिशस देशे सम्प्राप्तवती । राजधान्यां पोर्ट लुइस इत्यत्र राष्ट्रपत्युः औपचारिक-स्वागतं जातम् । मॉरिशस देशस्य प्रधानमन्त्रिणा प्रविन्द जुगनैथेन अन्यैः गणमान्यैः च सर-शिवसागर-रामगुलाम- अन्ताराष्ट्रिय विमान स्थानके राष्ट्रपत्युः मुर्मु वर्यायाः स्वागतं कृतवन्तः । मॉरिशस देशस्य स्वीय-आधिकारिक यात्रायाः प्रथमे दिने राष्ट्रपति- इत्यनया द्रोपदी मुर्मु वर्यया मॉरिशस देशस्य राष्ट्रप्रपत्युः पृथ्वीराज सिंह-रुपनस्य आधिकारिक -आवासे स्टेट हाउस् इत्यत्र द्विपक्षीय- उपवेशने भागं ग्रहीतम्।

## ओपेनहाइमर-चलचित्रेण कैलिफोर्नियायाः लॉस एंजिलिस-स्थले षण्णवतितम-ऑस्करपुरस्कारे सर्वश्रेष्ठ-विजयत्वम् अवाप्तम्



रॉबर्ट ओपेन हाइमर इत्येतस्य जीवनम् अधिकृत्य निर्मितेन ओपेनहाइमर-चलचित्रेण कैलिफोर्नियायाः लॉस एंजिलिस-स्थले षण्णवतितम-ऑस्कर पुरस्कारे सर्वश्रेष्ठ-विजयत्वम् अवाप्तम्। अनेन चलचित्रेण सर्वश्रेष्ठ चलचित्रम् सर्वश्रेष्ठ अभिनेता इत्येतौ समेत्य आहत्य सप्तपुरस्काराः विजिताः। किलियन मर्फी इत्यमुना एतदर्थं सर्वश्रेष्ठ अभिनेतुः पुरस्कारः विजितः। परमाणु-विस्फोटस्य जनकस्य ओपेनहाइमर इत्येतस्य जीवनम् आधारिकृत्य इदं चलचित्रम् क्रिस्टोफर नोलान इत्यमुना विनिर्मितम्। अस्य चलचित्रस्य नामांकनं त्रयोदश-श्रेणिषु विहितमासीत्। एतस्मै चलचित्रार्थं रॉबर्ट डाउनी जूनीयर इत्यमुना सर्वश्रेष्ठ सहायकाभिनेतुः सहैव क्रिस्टोफर नोलान इत्यमुना सर्वश्रेष्ठ निर्देशकस्य पुरस्कारः सम्प्राप्तः। ऑस्कर-समारोहे एम्मा-स्टोन इत्यस्यै पुअर थिंग्स-चलचित्रे स्वीय भूमिकार्थं सर्वश्रेष्ठ अभिनेत्र्याः पुरस्कार दा वाइन जॉय रेंडोल्फ इत्यनया सम्प्राप्तः। ऑस्कर पुरस्कार-समारोहावधौ भारतीय-कला-निर्देशकाय नितिन-चन्द्रकान्त-देसाई इत्यस्मै श्रद्धांजलिः समर्पितः । तस्य निधनं त्रयोविंशत्यधिक-द्विसहस्रतमवर्षस्य अगस्तमासस्य द्वितीय-दिनाङ्के समजायत।

## प्रमुखाः वार्ताः

## इंडोनेशियायाः सुमात्राद्वीपे जलाप्लावेन मृतकानां संख्या समेहय षड्विंशतिः



इंडोनेशियायाः सुमात्राद्वीपे जलाप्लावेन मृतकानां संख्या समेहय षड्विंशतिः अभवत्। अकस्मात् आगतेन जलाप्तावेन भूस्खलनेन च अस्मिन् क्षेत्रे महती क्षतिः समभवत्। पश्चिमी-सुमात्राप्रान्ते गुरुवासरे वर्षाकारणात् नद्यां जलप्रवाह तीव्रः सञ्जातः अनेन कारणेन नव-जनपदेषु सहैव केषुचित् नगरेषु च जलाप्लावः समागतः। आपत्प्रबन्धन-अभिकरणेन कथितं यत् प्रभावितक्षेत्रेषु विद्युदभावेन, सेतूनां श्रतिग्रस्तेन सहैव मार्गावरोधेन च सुरक्षा कार्येषु बाधाः जायन्ते। अभिकरण- प्रवक्त्रा अब्दुल मुहारी इत्यमुना प्रोदीरितं यत् सुरक्षाकर्मिभिः पेसिसिर-सेलातान-एवं पदांग परियामान-जनपदेषु केचन शवाः प्रत्याहताः। अननैव सह मृतकानां संख्या आहत्य षड्विंशतिः अभवत्। मुहारी इत्यमुना कथितं यत् पश्चिम-सुमात्राप्रान्ते सप्तत्रिंशत्-सहस्त्र भवनानि जलाप्लावेन विनष्टानि सन्ति

## सुभाषितम्

**गुणी गुणं वेत्ति न वेत्ति निर्गुणो,**
**बली बलं वेत्ति न वेत्ति निर्बलः।**
**पिको वसन्तस्य गुणं न वायसः,**
**करी च सिंहस्य बलं न मूषकः ॥**

भावार्थः- गुणी पुरुष ही दूसरे के गुण पहचानता है, गुणहीन पुरुष नहीं। बलवान पुरुष ही दूसरे का बल जानता है, बलहीन नहीं। वसन्त ऋतु आए तो उसे कोयल पहचानती है, कौआ नहीं। शेर के बल को हाथी पहचानता है, चूहा नहीं।

*प्रतीकसाठ्ये मुम्बई*

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## किन्नौरस्य भावा-उपत्यकायां हिमचक्रवातस्य आघातेन त्रयः श्रमिकाः मृताः, द्वौ च घातितौ



**हिमसंस्कृतवार्ताः- किन्नौरम्।**
हिमाचलप्रदेशस्य किन्नौरजनपदस्य भावा-उपत्यकायां मुसरिंगे हिमचक्रवातस्य आघातेन त्रयः श्रमिकाः मृताः, द्वौ च घातितौ। सूचनानुसारं हिमस्खलनात् पूर्वम् आगतस्य प्रचण्डस्य चक्रवातस्य कारणेन श्रमिकाः विकीर्णाः अभवन्। दुर्घटनायां त्रयः श्रमिकाः स्थले एव मृताः, द्वौ च घातितौ अभवन्। सूचना प्राप्तमात्रेण कम्पनी-अधिकारिणः, पुलिस-दलेन च तत्स्थानं प्राप्य मृतशरीराणि स्वस्य स्वामित्वे गृहीतानि। पीएचसी- कटगांवें एकः घातितः व्यक्तिः मृतः। सूचनाप्राप्ते सति पुलिसथानाप्रभारी भावानगरं जगदीशठाकुरः, तहसीलदारः भावानगरमपि तत्स्थानं प्राप्तवन्तौ।
पुलिसस्थानक-भावनगरात् प्राप्तसूचनानुसारं सोमवासरे अपराह्णे १:०० वादने निर्माणाधीननिजीकम्पन्याः सर्वे श्रमिकाः मध्याह्नभोजनं कुर्वन्तः आसन्, तदा सहसा हिमस्खलनस्य पूर्वं हिमचक्रवातः आगतः, श्रमिकाः तस्मिन् निरुद्धाः अभवन्। श्रमिकः सीमनकिन्डो ग्रामः उर्मी, विरयां-उराव-कूचाटोले च स्थले एव मृतौ यद्यपि तु रतनलालः कूचाटोले झारखण्डम् पीएचसी-कटगांवे मृतः। घातितः श्रमिकः कृष्णः महात्मागांधी- चिकित्सालयः खनेरीतः रामपुरं प्रेषितः। चन्द्रनाथः झारखण्डनिवासी इत्यस्य पीएचसी-कटगांवे चिकित्सा प्रचलति। पुलिसेन प्रकरणस्य पञ्जीकरणं कृत्वा अन्वेषणं आरब्धम् अस्ति।

## राज्यपालः शिवप्रतापशुक्लः मार्चमासस्य १३ दिनाङ्के नाहानस्य भ्रमणं करिष्यति

**(हिमसंस्कृतवार्ताः प्रवीणकुमारः) नाहनम् ११ मार्चः।** उपायुक्तः सिरमौरः सुमितखिमटा उक्तवान् यत् राज्यपालः शिवप्रतापशुक्लस्य नाहानस्य भ्रमणं १३ मार्चदिनाङ्के प्रस्तावितं अस्ति। सुमित खिम्टा राज्यपालस्य नाहनप्रवासकार्यक्रमं सफलं कर्तुं सर्वान् आवश्यकान् व्यवस्थान् सम्पन्नं कर्तुं सम्बन्धिताधिकारिभ्यः निर्देशं दत्तवान्। अपर जनपद-दंडाधिकारी सिरमौरः एल आर वर्मा, सहायक आयुक्तः गौरव महाजनः, अपर पुलिस अधीक्षकः योगेश रोल्टा, कमाण्डेन्ट होमगार्ड टी आर शर्मा, अधीक्षक अभियंता लोक निर्माण विभागः अरविंद शर्मा, अधीक्षक अभियंता जल शक्ति राजीव महाजनः, जिला कल्याण अधिकारी विवेक अरोड़ा, कार्यकारी नगर परिषद नाहनम् संजय तोमरः, उप संचालकः कृषि राजेन्द्र ठाकुरः, उप संचालक उद्यानिकी एस. के बक्षी इत्यस्य अतिरिक्त विभिन्नविभागानाम् अधिकारिणः अपि अस्मिन् अवसरे उपस्थिताः भवेयुः।

## सर्वकारेण पूर्णा कृता १५०० रुप्यकाणां वृत्तिप्रदानस्य प्रतिज्ञा महिलाभ्यः कृतं वचनं पूरितम्- जैनब चंदेल



**हिमसंस्कृतवार्ता- कार्यालयीयः प्रतिनिधिः।** हिमाचलप्रदेशस्य महिलाकाङ्ग्रेसस्य अध्यक्षा जैनब चंदेल उक्तवती यत् काङ्ग्रेससर्वकारः सर्वदा महिलानां हितैषी एव अस्ति। हिमाचलप्रदेशे गृहनिर्माणार्थं एकलमहिलानां कृते सर्वकारः धनं ददाति। सर्वाधिका प्रतिज्ञा अस्ति यत् महिलाभ्यः १५०० रूप्यकाणां वृत्तिप्रदानस्य वचनं पूरितम्। महिलाकाङ्ग्रेसः महिलाधिकाराय सदैव सज्जा वर्तते। काङ्ग्रेसदलस्य राष्ट्रियाध्यक्षा अल्का लाम्बा प्रायः २५ राज्येषु महिलानां स्वरम् उत्थापितवती अस्ति। महिलान्यायस्य विषये महिलाकाङ्ग्रेसः देशे सर्वत्र महिलानां उपरि अत्याचारस्य विरुद्धं स्वरं उत्थापयति। सा रविवासरे काङ्ग्रेसकार्यालये राजीवभवने नारीन्यायसम्मानसमारोहं सम्बोधयति स्म। महिलाकाङ्ग्रेसस्य अध्यक्षा जैनबचंदेल उक्तवती यत् समाजे महिलाः केभ्यः अपि न्यूनाः न सन्ति। देशे राज्ये च स्वस्य उपलब्धिभिः स्वस्य तादात्म्यं निर्मितम्। सः अवदत् यत् अस्माभिः प्रत्येकमहिलायाः आदरः करणीयः, ताः अग्रे गन्तुं प्रेरयितुं च संकल्पः करणीयः।
सा सर्वाः महिलाः एकीकृत्य महिलान्यायार्थं युद्धं कर्तुं आह्वयत्। अस्मिन्नवसरे महिलाकांग्रेसस्य शिमलाग्रामीणस्य अध्यक्षा वनिता वर्मा कार्यक्रमस्य अध्यक्षतां कृतवती कार्यक्रमे विभिन्नखण्डेभ्यः उत्तमं कार्यं कुर्वतीनां महिलानां सम्मानः कृतः।

## उच्चन्यायालयेन वनमित्रनियुक्ति-प्रक्रियायाः साक्षात्कारे कृतः प्रतिबन्धः



हिमाचल-उच्चन्यायालयेन सम्प्रति वनमित्राणां नियुक्त्यां साक्षात्कारेषु प्रतिबन्धः कृतः अस्ति। अस्य प्रतिबन्धस्य अनन्तरं राज्यस्य वनविभागस्य अन्तर्गतं भवितुं गच्छति २०६१ वनमित्राणां नियुक्तिप्रक्रिया स्थगिता भविष्यति। प्रकरणस्य श्रवणकाले वनविभागेन उच्चन्यायालये उक्तं यत् वनमित्रम् इत्यस्य नियुक्त्यर्थं साक्षात्कारसम्बद्धः विषयः आवश्यकस्पष्टयर्थं राज्यसर्वकाराय प्रेषितः अस्ति। अस्मिन् विषये आवश्यकः निर्णयः सम्भवतः सप्ताहद्वयानन्तरं भविष्यति इति सर्वकारेण न्यायालये उक्तम्। एतस्य वक्तव्यस्य अनन्तरं न्यायाधीशः संदीपशर्मा वनमित्रस्य नियुक्त्यर्थं कृतेषु साक्षात्कारेषु प्रतिबन्धं कृतवान्, परञ्च वनविभागेन न्यायालयाय आश्वासनं दत्तम् आसीत् यत् सम्प्रति एताषां नियुक्तिनां कृते कोऽपि साक्षात्कारः न क्रियते इति। प्रकरणानुसारं आवेदिका दीक्षापंवरः आरोपितवती यत् वनविभागः वनमित्राणां नियुक्त्यर्थं साक्षात्कारं कर्तुं गच्छति, यदा तु 17 अप्रैल 2017 दिनाङ्के राज्यसर्वकारेण तृतीयचतुर्थवर्गस्य पदयोः साक्षात्कारं न कर्तुं अधिसूचना अधिसूचिता आसीत्। आरोपः अस्ति यत् सर्वकारस्य अधिसूचनायाः विपरीतम् वनविभागः साक्षात्कारं कृत्वा स्वस्य प्रियजनानाम् लाभं कर्तुम् इच्छति। वनविभागः कथयति यत् वनमित्रं नियमितपदं नास्ति न च तेषां सेवास्थितयः नियमितकर्मचारिणां सदृशाः सन्ति, अतः एतेषां पदानाम् साक्षात्कारः कृतः। अस्य प्रकरणस्य श्रवणं मार्चमासस्य २२ दिनाङ्के निर्धारितः अस्ति।



## इन्दौराविधानसभाक्षेत्राय कोटिमूल्यानां उपायनानि मुख्यमन्त्री स्वस्य प्रवासे उद्घाटनानि, आधारशिलाः च अस्थापयत्

हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।
मुख्यमन्त्री सुखविन्द्रसिंहसुक्खुः सोमवासरे इन्दौराविधानसभाक्षेत्रस्य प्रवासे आईटीआई भवनस्य गंगथस्य उद्घाटनं कृत्वा बालकानां कृते समर्पितवान्। एतत् भवनं ५३६.१७ लक्षरूप्यकाणां व्ययेन सम्पन्नम् अस्ति, एतेन सह ताराखड्ड इत्यत्र ३२४.८६ लक्षरूप्यकाणां व्ययेन निर्मितस्य सेतोः अपि उद्घाटनं मुख्यमन्त्रिणा कृतम्।
एतदतिरिक्तं विधानसभाक्षेत्रे जायमानानां कार्याणां शिलान्यासः अपि मुख्यमन्त्रिणा कृतः। येषु कार्येषु मुख्यमन्त्री शिलान्यासं कृतवान् तेषु घण्डरांतः रैहनमार्गपर्यन्तं २७४३.९४ लक्षरूप्यकाणि, बाई इन्दौरियातः मण्डमियानीमार्गः २३०१.८१ लक्षरूप्यकाणि मंदोलीतः टप्पा पलाहघाटं १२०४.१३ लक्षरुप्यकाणि, गंगथतः घेटामार्गः ८९७.६५ लक्षरुप्यकाणि मकरोली- चंगराडामार्गः १२५१.९९ लक्षरुप्यकाणि, इंदौरातः काठगढ़मार्गः १२५७.६५ लक्षरुप्यकाणि, बलीरतः डैंकवांमार्गः ६३५.२८ लक्षरुप्यकाणि सहितं सप्तमार्गाणां १२२९२.४५ लक्षरुप्यकैः नवीनीकरणं भविष्यति। एतदतिरिक्तं गंगथबली एवं बड़ूखरम् इत्यत्र उठाऊ उत्थापित-पेयजलयोजनायाः अपि शिलान्यासः कृतः ये योजने ५४६.९६ लक्षरूप्यकाणां व्ययेन सम्पन्ने भविष्यतः। एतस्य अतिरिक्तं मण्डक्षेत्रे ६ ट्यूबकूपानां, इन्दौरानगरे १९ ट्यूबकूपानां च आधारशिला स्थापिता भविष्यति, येषां निर्माणं प्रायः १९७६ लक्षरूप्यकाणां व्ययेन भविष्यति तदतिरिक्तं सूरजपुर-उपनदस्य बाढनियन्त्रणकार्यमपि ५६३.६१ रुप्यकाणां व्ययेन भविष्यति।

## उपमुख्यमन्त्रिणा मुकेश अग्निहोत्रिणा पण्डोगा-त्यूड़ी-सेतोः भूमिपूजनं कृतम्



हिमसंस्कृतवार्ता- ऊना। पण्डोगा-त्यूड़ी-सेतुः शीघ्रमेव जनानां कृते सुविधां प्रदास्यति। सोमवासरे उपमुख्यमन्त्री मुकेश-अग्निहोत्री पण्डोगा-त्यूड़ी- सेतोः भूमिपूजनं कृतवान्। अस्य सेतोः निर्माणकार्यं पञ्चकुलायाः अङ्कुशबंसल कम्पनी द्वारा क्रियते। पण्डोगा-त्यूडी-सेतुः ५०.६० कोटिरूप्यकाणां व्ययेन निर्मितः भविष्यति। सेतोः कुलदीर्घता ५६० मीटर भविष्यति। एतत् एव न, सेतुम् उभयतः पण्डोगातः त्यूपर्यन्तं प्रायः त्रिकिलोमीटर दीर्घः मार्गः अपि निर्मितः भविष्यति। मार्गस्य विस्तारः सप्त मीटर भविष्यति। अस्य सेतोः बजटं सेतुबन्धनयोजनायाः अन्तर्गतं केन्द्रीयमार्गमूलसंरचनाकोषेण प्राप्तम् अस्ति। अयं सेतुः हरोली, गगरेटं चिंतपूर्णी, कुटलैहड़म् विधानसभानां क्षेत्राणि संयोजयितुं कार्यं करिष्यति।

# मण्डीतः चंडीगढ़पर्यन्तं मात्रहोरात्रयम् प्रधानमंत्रिणा नरेन्द्रमोदिना किरतपुर-मनाली-चतुष्पंक्तिराजमार्गस्य पुङ्घपर्यन्तं लोकार्पणम् कृतम्







हिमसंस्कृतवार्ता- कार्यालयीयः अधुना जनाः मण्डीतः चण्डीगढं सहजतया स्ववाहनेन त्रिषु होरासु गन्तुं शक्नुवन्ति। पूर्वं षड्होरासु चण्डीगढं प्राप्तुं न शक्यते स्म । बिलासपुरजनपदस्य स्वारघाटस्य आरोहणावरोहणस्य उपद्रवं दूरं कृत्वा प्रायः ४० किलोमीटर् दूरं न्यूनीकृत्य धनस्य समयस्य च रक्षणं भविष्यति। मालवाहनस्य अपि न्यूनता अभवत् । कृषकाणां, उद्यानपालकानां च नवीनाः उत्पादाः अन्यराज्यानां विपणीषु अपि सहजतया गमिष्यन्ति। एषा चतुष्पंक्तिमार्गः हरित-भूर-क्षेत्रयोः विभक्तः अस्ति । प्रायः ४८ कि.मी.दीर्घं भूरेण, २१.२०३ कि.मी.दीर्घं हरितक्षेत्रं चतुःमार्गं निर्मितम् अस्ति । यात्रां सुलभं कर्तुं पञ्जाबसीमायां कैन्चीमोडात् सुन्दरनगरस्य भवानापर्यन्तं पञ्च कन्दराः, २५ बृहत्, १७ लघु सेतवः निर्मिताः सन्ति । पञ्चानां कन्दराणां दीर्घता प्रायः सार्धपञ्चकिलोमीटर् भवति । कुल्लुपर्यन्तं चतुष्पंक्तिराजर्मार्गस्य निर्माणकार्यं सम्पन्नम्।

## प्रधानमंत्री मोदी उदाहरणं उपस्थापितवान्

अस्य त्रिचरणीयं उद्घाटनं गतवर्षस्य जून-जुलाई-मासे प्रस्तावितं आसीत् । मण्डीतः मनालीपर्यन्तं मार्गस्य जुलै-अगस्त-मासयोः आपदायाः कारणेन महती क्षतिः अभवत् । अस्य कारणात् उद्घाटनकार्यक्रमः स्थगितः अभवत् । निर्वाचनसमये जनसमूहं भ्रमितुं राजनैतिकदलानि अर्धसमाप्तविकासकार्यस्य उद्घाटनं कुर्वन्ति । एतत् न कृत्वा प्रधानमंत्री मोदी उदाहरणं उपस्थापितवान्। किरतपुर-मनाली-चतुष्पंक्तिराजमार्गस्य यावत् कार्यं सम्पन्नम् तावत् उद्घाटितम् अस्ति। एवं तु नौलखातः नागचलापर्यन्तं चतुःमार्गः निर्मितः अस्ति । वाहनानि अपि आगच्छन्ति। सुन्दरनगर उपमार्गस्य अपूर्णतायाः कारणात् नागचलापर्यन्तं तस्य उद्घाटनं न अभवत्। मोदी हिमाचलस्य जनानां कृते ६७१३ कोटिरूप्यकाणां परियोजनानां उपहारं दत्तवान्।

## एतेषां विकासकार्याणां कृते आधारशिलाः स्थापिताः

प्रधानमंत्री मोदी हमीरपुर उपमार्गस्य (चिलबहलस्य) अन्ततः ज्वालामुख्याः भांगबरखण्डपर्यन्तं ११४६ कोटिरूप्यकाणां व्ययेन निर्माणाधीनस्य धातुस्कन्धयुक्तस्य ३७ कि.मी. राष्ट्रियराजमार्गस्य आधारशिलाम् अस्थापयत्। प्रधानमन्त्रिणा राष्ट्रियराजमार्गस्य १०३ एवं ३ शिमला मटौरम् इत्यत्र ७३९ कोटिरूप्यकाणां व्ययेन १७ कि.मी.दीर्घस्य हमीरपुर-उपमार्गस्य निर्माणस्य, पठानकोट-मण्डी-चतुष्पंक्तिराजर्मार्गे काङ्गड़ाजनपदस्य सिहुनीतः राजोलपर्यन्तं ६३७ कोटिरूप्यकाणां व्ययेन निर्माणाधीनस्य १८ कि.मी दीर्घस्य चतुष्पंक्तिराजर्मार्गस्य पुनर्वासस्य, उन्नयनस्य च शिलान्यासः कृतः । अस्मिन् एव मार्गे ८३७ कोटिरूप्यकाणां व्ययेन निर्मितस्य १६ किलोमीटर् ठानपुरी परोर चतुष्पंक्तिराजर्मार्गस्य आधारशिला अपि स्थापिता।

पहाड़ी गल्लां हिमसंस्कृतवार्ताः

## चऊँ दिनां री ज़िन्दगी



मेरी मेरी करदे करदे ई करने पौणी त्यारियाँ
चऊँ दिनां दी ज़िन्दगी कई लगिरियाँ बमारियां
बस खड़ी स्टेशनां पर जाणा नी चाहन्दी सवारियां
कितने दिन रहणा इत्थी पता नी काहलूँ भरनी उड़ारियां
इक दूजे पर भरोसा नी करदा हुण माहणु
बधी गईयाँ बड़ी वेतवारियाँ
अज तिसरा जे सौदा बिक़दा खरा
कल बंद हुई जाणी तिसरी बी दुकानदारियाँ
कल तक जित्थी महल थे बड्डे बड्डे
अज तित्थी जम्मी रियाँ बड्डियाँ बड्डियाँ झाड़ियां
पुराणियाँ जनाना खेतें घरें कम्म करदी थियाँ सारा
अज कम्म करी ने राजी नी नवियाँ लाड़ियाँ
चोरी चकारी गुंडागर्दी बेईमानी हुण सारे खा
कर्जा चकिरा दुनियाँ भरा रा बौहत हुई गी देनदारियां
कर्जा लैंदी हाण बणदे थे बड़े शरीफ
टाहन्दी हाण मित्रां रियाँ अड्डियाँ घसाणियाँ
चऊँ दिनां री ज़िन्दगी कुछ खरा कम्म करी लौआ
पापा रिया कमाईया री गठडियां कन्ने नी जाणियाँ
सैजे कर्म किते खरे या माड़े तिन्हांरा देने पौणा लेखा
सई बाटां मिलणी अग्गे सैजे तुहां इत्थी बणाणियाँ



रवींद्र कुमार शर्मा
घुमारवीं
जिला बिलासपुर हि प्र

# प्रमोदकुमारसिंहःनिजीविद्यालय-सङ्घस्य मोतिहारीनगराध्यक्षः, वरुणकुमारपाण्डेयः नूतनः नगरसचिवः, सतेन्द्रसिंहः कोषाध्यक्षः अभवत्

**हिमसंस्कृतवार्ताः- कुणाल कौशिकः, मोतिहारी।** शनिवासरे के. डी. एम पब्लिक विद्यालयः बेलबनवानगरे, निजीविद्यालयसङ्घस्य इत्यत्र इत्यस्य नगरकार्यकारीयाः अतीव महत्त्वपूर्णा सभा आयोजिता, यस्यां नूतननगरकार्यकारिण्याः पुनर्गठनं कृतम्। यस्मिन् सर्वसम्मत्या नगराध्यक्षत्वेन प्रमोद कुमार सिंहः, नगरसचिवः वरुणकुमारपाण्डेयः, कोषाध्यक्षः सतेन्द्रकुमारसिंहः, संयोजकः धर्मेन्द्रकुमारमिश्रा, उपाध्यक्ष राजेशकुमारश्रीवास्तवः, कार्तिक प्रसादतेतरिया चयनिताः। कार्यकारिणी समितिः अपि नामाङ्कनं कृत्वा गठितम्। यस्मिन् संतोषकुमारसिंहः, प्रखंड-अध्यक्षः, पप्पुकुमारः खण्डसचिवः, संजयकुमारः प्रखंडकोषाध्यक्षः कृताः आसन्। सर्वे नवनिर्वाचिताः अधिकारिणः जिला- अध्यक्ष संतोष रौशनः, जिलासचिव मृत्युंजय मिश्रा, जिला- कोषाध्यक्ष दीनाराही स्वागतं कृत्वा माल्यं पुष्पगुच्छं च दतवान्। निजीविद्यालयसङ्घस्य सभायां प्रदेशाध्यक्षः भूषणकुमारः, अभयमिश्रः, शिवकिशोरसिंहः, पुण्यदेवयादवः, प्रदेशसचिवः राजीवरंजनः, पूर्वनगरसचिवः रोशनकुमारः, पूर्व जिला- अध्यक्ष राहुल गुप्ताः, बाल्मीकी किशोरः, राजेश श्रीवास्तवः, मिथिलेश कुमारः, सुधीर कुमारः, मनीषकुमारः आदीनां पदाधिकारिणां स्वागतं कृतम् यस्मिन् संस्थायाः सुदृढीकरणाय तस्य विस्ताराय च कार्यं कर्तुं निजीविद्यालयैः सह सम्बद्धानां सर्वविधसमस्यानां समाधानार्थं च सहमतिः अभवत्। आगामिहोलीमिलनस्य भव्योत्सवस्य आयोजनार्थं चर्चाः कृताः।

# कोऽपि देशः महिलाशक्तेः गौरवं वर्धयित्वा तेषां कृते अवसरं वर्धयित्वैव अग्रे गन्तुं शक्नोति- प्रधानमन्त्री

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् कोऽपि देशः महिलाशक्तेः गौरवं वर्धयित्वा अपि च तेषां कृते नवावसरान् सृजित्वैव अग्रे गन्तुं शक्नोति । श्रीमोदिना नवदिल्ल्यां सशक्तनारी- विकसित-भारत कार्यक्रमं सम्बोधयता इदमुक्तम्। कार्यक्रमावधौ प्रधानमन्त्रिणा एक सहस्रं यावत् ड्रोन इति यन्त्राणां भगिनीषु वितरणं कृतम्। श्रीमोदिना उक्तं यत् देशोऽयं विभिन्न क्षेत्रेषु भारतस्य नारी शक्तेः उपलब्धिसु गौरवान्वितं वर्तते । तेनोदीरितं यत् सर्वकारस्य विभिन्न- योजनाभिः एक कोटितोप्यधिकाः महिलाः लखपति दीदीति सञ्जाताः। प्रधानमन्त्रिणा मोदिना उक्तं यत् चतुर्विंशत्यधिक द्विसहस्रतमे वर्षे सत्ता प्राप्तेः अनन्तरं नैकाः योजनाः महिलाभ्यः आनीताः अपिच तेषां सफलतया शुभारम्भोऽपि जातम्।



तेन विश्वसितं यत् देशस्य महिलाः एकविंशतिः शताब्ध्याः भारतस्य प्रौद्योगिक क्रान्त्याः नेतृत्वं करिष्यन्ति। प्रधानमन्त्रिणा उक्तं यत् आगामि वर्षेषु ड्रोनेति प्रौद्योगिक्याः देशे विस्तारं भविष्यति। देशे नमो ड्रोन भगिनी प्रति- अनेकावसराः अगच्छन्ति । श्रीमोदिना प्रोदीरितं यत् देशे स्वयं सहायता दलैः महिला- शक्तिकरणस्य दिशि नूतन ऐतिह्यं विरचितम्। अवसरेऽस्मिन् श्रीमोदिना दीनदयाल-अन्त्योदय-योजनाः राष्ट्रिय-ग्रामीण-अजीविका मिशन इत्यनयोः सह्योगेन याभिः भगिनीभिः सफलता प्राप्ताः ताः सम्मानिताः। एताभिः योजनाभिः स्वयं-सहायता समूहसदस्येभ्यः प्रोत्साहनं समर्थनञ्चापि प्रदीयते। प्रधानमन्त्रिणा प्रत्येकजनपदेषु बैंक-सम्पर्क-शिविराणां माध्यमेन स्वयं-सहायता-समूहेभ्यः अष्ट-सहस्त्र-कोटिरुप्याकाणां ऋणमपि प्रदत्तम्।

## स्पेनदेशे युरोपा कप-क्रीडायां भारतीयनाविकः विष्णुसरवाननः स्वर्णपदकं प्राप्तवान्

स्पेनदेशे युरोपा कप-क्रीडायां भारतीयनाविकः विष्णुसरवाननः स्वर्णपदकं प्राप्तवान् । अस्याः प्रतियोगितायाः आयोजनं रियल क्लब नौटिक् पोर्ट् डी पोलेन्का इत्यनेन कृतम् आसीत् । ११ नौकाधावने सरवाननः १७ शुद्धाङ्कैः शीर्षस्थानं प्राप्तवान् । नीदरलैण्ड्-देशस्य विलेम् वियर्सेमा अपि एतावता अंकानाम् अङ्कं प्राप्तवान् किन्तु सरवाननः तान्त्रिक-आधारेण श्रेणीं जितवान्।
अस्मिन् वर्षे यूरोपा-कप-क्रीडायां ऐतिहासिकं सहभागिता अभवत्, यत्र १५ ग्रन्थिभ्यः त्रिंशत्-ग्रन्थिभ्यः अधिकं वायुवेगेन सह चुनौतीपूर्णासु परिस्थितिषु त्रिशतचतुस्त्रिंशत् नाविकाः स्पर्धां कृतवन्तः



# रमणमहर्षेः विचारसङ्ग्रहः

**गतांकादग्रे**

14 शिष्यः– संन्यासस्य मूलहेतुः कः?

महर्षिः– संन्यासः नाम 'अहम्' इति विचारस्य त्यागः न तु केवलं बाह्यवस्तूनाम्। यः 'अहम्' इति विचारं त्यजति सः एकाक्यवस्थायाम् अथवा घोरसंसारे अपि समः एव भवति। यथा एकस्मिन्नेव वस्तुनि एकाग्रं मनः समीपस्थान्यपि अन्यवस्तूनि नैव पश्यति, तथैव साधुः सर्वाणि सांसारिकाणि कार्याणि कृत्वा अपि वस्तुतः किमपि न करोति; यतः अहम् इति विचारस्य उद्भवं निरुध्य सः मनः केवलम् आत्मन्येव स्थापयति। यथा बाह्यतः अचलः इव तिष्ठन् मनुष्यः तस्य स्वप्ने अधःशिरः सन् पतति तथैव अज्ञानी मनुष्यः (नाम यस्य कृते 'अहम्' इति विचारः न स्थगितः सः) बाह्यतः निष्क्रियः, सन्ततं ध्यानशीलः सन् अपि सर्वाणि संसारकार्याणि करोति एव इति आत्मवेत्तॄणां कथनम्।

**15शिष्यः– मनः बुद्धीन्द्रियाणि इत्यादीनि ज्ञानस्य उपकरणानि तथापि किमर्थं तानि ज्ञानस्य विषयभूतानि इव गृह्यन्ते?**

**महर्षिः- (कोष्टकम्--१)**

| | दृक् (ज्ञाता) | दृश्यम् (ज्ञानविषयः) |
|---|---|---|
| १ | द्रष्टा | घटः (दृश्यमानं वस्तु) |
| २ | नेत्रे | शरीरम्, घटः इत्यादि |
| ३ | दृष्टिज्ञानम् | नेत्रे |
| ४ | मनः | दृष्टिज्ञानम् |
| ५ | जीवः | मनः |
| ६ | चैतन्यात्मा | जीवः |

उपर्युक्तव्यवस्थायां वयं चैतन्यात्मस्वरूपाः सर्वेषामितरवस्तूनां ज्ञातारः स्मः अतः वयं दृक् इति शब्देन निर्दिष्टाः। सर्वेऽपि घटपर्यन्तः पदार्थविभागः नाम दृश्यवस्तूनि एव यतः सः ज्ञानस्य विषयः अस्ति। दृग्दृश्ये (ज्ञातृ-ज्ञेयविषयौ) दर्शयति उपरितनकोष्टके ज्ञातृषु ज्ञेयविषयेषु च एवं दृश्यते यत् यः पदार्थः अपरस्य कस्यचित्पदार्थस्य ज्ञाता सः स्वयमेव अन्यस्य कस्यचित् ज्ञानविषयः। अतः एतेषु कोऽपि न यथार्थतया ज्ञाता इति वक्तुं शक्यते। यतः वयं सर्वान् इतरान् पदार्थान् जानीमः तथापि वयं स्वं विहाय न कस्यचिदन्यस्य ज्ञानविषयः स्मः अतः वयं केवलं ज्ञातपदार्थानुरोधेन एव 'ज्ञातारः' इति संज्ञाभाजः। यथार्थतया पश्यामश्चेत् यः यः ज्ञानस्य विषयः सः न अस्मत् भिन्नः अतः वयं तत् सत्यं स्मः यत् ज्ञातृज्ञेयभेदात् परे तिष्ठति। अस्मान् विहाय अन्यत् सर्वं ज्ञातृ-ज्ञानविषयाणां क्षेत्रे एव वर्तते।

**16 शिष्यः– अहङ्कारः, जीवः, चिदात्मा एतेषां तादात्म्यं कथं भवति?**

**महर्षिः– (कोष्टकम्- २)**

| उदाहरणम् | निर्दिष्टम् |
|---|---|
| लोहगोलः | अहङ्कारः |
| तप्तलोहगोलः | चिदात्मनि अहङ्कारस्य अध्यासात् उत्पन्नः जीवः। |
| लोहगोलस्थः अग्निः | सर्वेषु जीवशरीरेषु दृश्यमानं ब्रह्मचैतन्यम्। |
| अग्निज्वाला | सर्वत्र समानरूपेण विद्यमानं सर्वव्यापि ब्रह्म |

उपरितनोदाहरणैः एतत् स्पष्टीभवेत् केन प्रकारेण अहङ्कार, जीवः, जीवसाक्षि चैतन्यं तथा च सर्वसाक्षि चैतन्यं एतेषां तादात्म्यं भवति।

**17 शिष्यः- कथं ज्ञातव्यं यत् हृदि आत्मैव स्वयं ब्रह्मत्वेन प्रकाशते?**

महर्षिः- यथा दीपज्योतौ विद्यमानं आकाशमहाभूतं ज्योतेः अन्तरं बाह्यं च अविशेषत्वेन व्याप्नोति तथैव चिदाकाशः अविशेषत्वेन हृदि स्थितस्य आत्मज्योतेः अन्तर्बाह्यं व्याप्य तिष्ठति। तस्यैव चिदाकाशस्य ब्रह्म इति ख्यातिः।

**श्री अभिजित्**
**तोडकरः सुभाषितशिक्षणप्रमुखः संस्कृतभारती, पश्चिममहाराष्ट्रम्।**

# दर्पणः

**अनन्त मुखार्जी, पश्चिमबंगम्।**

( पिउ भट्टाचार्य मुखार्जी इत्यस्याः आयना इति **बङ्गीयकथामूलस्य संस्कृतानुवादः**)



सन्धिपूजा समाप्तप्राया। पुरोहितवर्यः बहुक्षणं यावत् तिष्ठन् आरात्रिकं सम्पाद्य श्रान्तः सन् किञ्चित् पूर्वमेव सासने उपाविशत्। वस्त्रं किञ्चित् संकोच्य आनन्दानुभूतिम् अनुभवतः वदन् आसीत् – अहो! कश्चित् अस्ति वा, पानार्थं किञ्चित् जलं देहि। एतस्मिन् एव समये मण्डपस्य अन्यस्मिन् प्रान्ते कश्चित् शब्दः कर्णम् आगतः, "किं भोः ! भवती पुनः आगतवती, गच्छ वराकी गच्छ इतः"। कलिकातायाः स्वनामधन्यं पूजास्थलं, कोटिशः रूप्यकाणाम् सम्भावितः व्ययः। चाकचिक्यस्य कुत्रापि ह्रासः नास्ति। पंक्तिबद्धाः डिण्डिमाः, कांस्यघन्टाः विराजन्ते। उत्तमप्रकारके ध्वनिप्रक्षेपकयन्त्रे कुमारशानोः, मिता-च्यटर्ज्याः सुरदायिनी सङ्गीतप्रतिभा कर्णकुहरं रञ्जयति।एतान् सर्वान् स्वीकृत्य परिपूर्णमासीत् तत् स्थलम्। तत् सर्वं उत्क्रान्त्य मरुतां प्रवाहितोऽभूत् सः शब्दः। स्वाभाविकरूपेणैव तत्रोपस्थितानां सर्वेषां दृष्टिः एव तं शब्दम् अनुससार, पुरोहितमहाभागोऽपि न ततः भिन्नः आसीत्।

तस्मिन् क्षणे एव सः धावन् तत्र उपोस्थितोऽभवत्। अन्येऽपि सर्वे तत्रैव समागताः। विषये, तथा किञ्चित् गाम्भीर्यं नास्ति। पल्ल्याः एव एकः दुष्टप्रकृतिकः युवा सुबल-मन्ना मण्डपस्य एकस्मिन् पार्श्वे स्थितः सन् पूगचूर्णिकां चर्वयन् सर्वेभ्यः सन्धिपूजायाः प्रसादं वितरति स्म। अवसरे, अवकरपरिप्लुतां छिन्न-बोरखा-वस्त्रावृतां काञ्चित् अर्धोन्मादिनीं यवनतरुणीं पश्यन् तेन इदं तर्जनं स्वमुखात् निष्काशितम्।

"किं भोः सुबल! किं जातम्" – पुरोहितः अपृच्छत्।

- "पश्यन्तु भवन्तः एषा खलु उन्मादिनी पल्ल्यामेव अटति।षष्ठीतः विताडयामि एनाम्। अवकरपरिवृता, तदुपरि यवन-कन्यका, प्रतिदिनमेव प्रसादग्रहणसमये कुतश्चित् आगच्छति, वराकी भिक्षुका।"

- "अहो, तथा मा ब्रूहि। सा भिक्षुका इति स्यात्, एवं भवितुमर्हति। परन्तु, एषा तु बोरखा-वस्त्रधारिणी यवना !"

इमम् अन्तिमं पदमुच्चार्य ठक्कुरमहाशयः (पुरोहितः) तां कन्याम् उद्दिश्य किञ्चित् ताच्छिल्येन अवदत् – "अयि भोः, अयि कन्यके ! त्वम् इत अपसृत्य एकस्मिन् प्रान्ते तिष्ठस्व। पश्यामः, यदा सर्वेषां प्रसादग्रहणं समाप्तं भविष्यति तदा त्वमपि स्वीकुरु।"

"नहि, मया नैव गम्यते। अत्रैव प्रसादं स्वीकरोमि। अहं क्षुधार्ता अस्मि" - अवदत् सा तरुणी।

- "मा चपलतां कुरु। इतः गच्छेदानीम्। दास्यामः समाप्तौ।"

- "नहि, मया नैव गम्यते।"

एषा वितण्डा प्रचलन्ती सती तत्रैव इतोऽपि जनसम्मर्दः सञ्जातः। सर्वे एव नासिकायां करवस्त्रं संस्थापयन्तः तिष्ठन्तः आसन्। केचन च मुखपट्टिकायाः उपरि अपि करवस्त्रं संस्थापयन्ति स्म। सत्यं हि तस्याः कायः पूतिगन्धसमायुक्तः आसीत्। इतः परं पुरोहितवर्यः न किञ्चित् वभाष। तत्क्षणात् एव सुबल-मन्ना उच्चैः जगर्ज। अन्ये च जनाः केनापि प्रकारेण तां तरुणीं तिरस्करणपुरःसरं ततः अन्यत्र समुत्पाटयितुं प्रयतन्ते स्म।

सर्वे एव तां ततः अपसारयितुं प्रयतमानाः आसन् , सहसा एव छन्दपातः।


उपस्थितान् जनान् विस्माययन्ती सा युवती हठात् क्रोधोन्मत्ता सती सर्वान् स्वकायवेगेन अपसारयन्ती अन्यत्र समुत्क्षिप्तवती। केचन च पतिताः। कटुगन्धे सर्वेषां प्रायः वमनम् आगमिष्यति एतादृशी दशा। एतस्मिन् समये सा युवती क्रोधारुणलोचना सती सुबल-मन्नां संपश्यन्ती दीर्घं श्वासं त्यक्त्वा, गर्जितवती-

"रे राक्षस ! मम गात्रे गन्धः, अहं यवना अस्मि किल ! तर्हि तस्मिन् दिवसे यदा पानोन्मत्तः सन् मार्गात् मां बलपूर्वकं स्वीकृत्य ममास्ये वस्त्रखण्डं बद्ध्वा हराणस्य आपणस्य पार्श्वे बलच्चकार, तदा गन्धः न अनुभूतः वा ! अहं रोदिमि स्म। मम प्राणाः प्रायः बहिरागच्छन्ति स्म। कथञ्चित् हस्तेन अहं त्वा वारयितुं प्रवृत्ताभवम्।त्वं खलु नैव श्रुतवान्।मदीयं वस्त्रं छिन्नं जातम्। तस्मिन् समये, किमहं यवन-कन्यका नासम्। सज्जनः भवति, सज्जनः थुः !"

नैरन्तर्येण उक्तवती सा। ततः सा मण्डपस्य पुरस्तात् सुबल-मन्नाम् उद्दिश्य निष्ठीवितवती। कांस्य-ढक्कयोः सर्वे निनादाः स्तब्धाः सञ्जाताः। प्रायः कश्चित् युवकः ध्वनियन्त्रस्य नादमपि स्तब्धीकृतवान्। मञ्चे कीलकपतनसमा शान्तिः राजते स्म। सर्व एव वारैकं सुबलं प्रति दृष्टवन्तः। सुबलः तदा विनताननः, निष्पन्दः सञ्जातः। वेपथुमान् चाभवत्। किञ्चित् परं डिण्डिमवादकाः स्कन्धे डिण्डिमम् उत्थापयन्तः पुनः शनैः नादं कर्तुम् आरब्धवन्तः।

सा यवना इतोऽपि श्वासोच्छासं त्यजति स्म। प्रायः एतावन्तं कालं यावत् चित्कृतवती, अतः तथा आचरति। तस्याः क्रोधोन्मत्ते नयने तदापि न शान्ते अभवताम्।अन्ये च सर्वे गर्हया सुबल-मन्नां प्रति पश्यन्ति स्म।

केवलम् इदमेवानुभूयते यत् मण्डपमध्यस्थायाः देवीप्रतिमायाः ओष्ठयोः कश्चित् स्मितः हासः। प्रसन्नतायाः बहिःप्रकाशः स्यात्।




# विश्व- महिला- दिनम्

रूसदेशात् अमेरिकादेशं प्रवासं कृतवती अस्याः महिलायाः कारणात् विश्वमहिलादिवसः आचर्यते। पठन्तु तस्याः कार्यं किम्..

## टेरेसा सर्बर मल्कल!

किं भवता पूर्वं एतत् नाम श्रुतम्? नहि? अद्य वयं यत् अन्तर्राष्ट्रीयमहिलादिवसम् आचरामः तस्य अस्य नामस्य निकटसम्बन्धः अस्ति। यथा वयं वदामः सङ्घः, एतत् ज्ञातुं महत्त्वपूर्णं यत् दिवसस्य उत्सवस्य पृष्ठतः किं उपयुक्तकारणम् अस्ति, तस्य इतिहासः कः, कः एतत् पदं गृहीतवान्। यदि भवतः समीपे एषा सूचना अस्ति तर्हि तस्य दिवसस्य उत्सवस्य आनन्दः द्विगुणः भवति।

अधुना अद्यतनस्य अन्तर्राष्ट्रीयमहिलादिवसस्य उदाहरणं गृह्यताम्। सर्वे जानन्ति यत् विश्व महिलादिवसः अस्ति, परन्तु कोऽपि न जानाति यत् एतत् टेरेसा सरबेर मल्कल नामकया महिलायाः आरम्भः कृतः अभवत्। ल तमे वर्षे मेमासस्य प्रथमे दिनाङ्के रूसदेशस्य बार-नगरस्य यहूदीकुटुम्बे अभवत्। जन्मतः एव यहूदीविरोधिवातावरणे वर्धमाना टेरेसा स्वपरिवारेण सह रूसदेशस्य ज़ार-शासनकाले महतीं दुःखं प्राप्नोत्। तस्य कारणात् ततः अनेके कुटुम्बाः अमेरिकादेशं प्रति प्रवासं कृतवन्तः। टेरेसा इत्यस्याः परिवारः अपि तत्र आसीत्। १८९१ तमे वर्षे अमेरिकादेशम् आगत्य टेरेसा अन्येषां बहूनां यहूदीनां इव जीवनयापनार्थं कार्यं कृतवती। प्रथमं बेकरीयां, ततः वस्त्र यंत्रागारे कार्यं प्राप्तवति। स्वभावतः आन्दोलनम्, विद्रोही च इति कारणतः तस्य ध्यानं श्रमिकमहिलानां विषयेषु आकृष्टम् आसीत्। टेरेसा एतादृशी महिला नासीत् या केवलं समस्याः अवलोक्य मौनम् एव तिष्ठति स्म। सा चिन्तवती यत् तासां समस्यानां समाधानार्थं किं कर्तुं शक्यते? तस्मात् च सा कार्यरतानाम् महिलानां संगठनस्य निर्माणं कृतवती। अस्मात् महिलासङ्गठनात् सा प्रवासीश्रमिकमहिलानां स्वरं उत्थापयितुं कार्यं आरब्धवती।

......क्रमशः सुधा साठ्ये मुंबई।